# आचार्यप्रथमवर्षम्

# चतुर्थपत्रम्-नव्यन्यायः

# शैक्षिकनिष्पत्तिः

**ग्रन्थः – सत्प्रतिपक्षः**

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- ❖पूर्वपक्षीयस्य सत्प्रतिपक्षलक्षणचतुष्टयस्य परिशीलनं, सत्प्रतिपक्षसिद्धान्तलक्षणद्वयस्य ससमन्वयं दलकृत्यं चावगच्छेयुः।
- ❖सत्प्रतिपक्षस्य स्वार्थानुमाने एव दोषत्वमिति मतस्य परिशीलनं, सत्प्रतिपक्षस्य उपजीव्यत्वेन दोषत्वं चावगन्तुं शक्नुवन्ति।
- ❖संशयजनकत्वं सत्प्रतिपक्षदूषकताबीजम् इति मतस्य परिशीलनं, सिद्धान्तानुसारं सत्प्रतिपक्षस्य दूषकताबीजं च विज्ञातुं शक्नुवन्ति।
- ❖संशयाकारानुमितिवादिनां रत्नकोषकाराणां मतस्य परिशीलनं ज्ञातुं शक्नुवन्ति।
- ❖संशयाकारानुमितेः उपपादकयुक्तीः निरासकयुक्तीः, गदाधरभट्टाचार्यसम्मतां संशयाकारानुमितिसमर्थकयुक्तिं चावगन्तुं शक्नुवन्ति|
- ❖हेत्वाभासानां फलद्वारकलक्षणानि, प्रकरणसमस्य जिज्ञासकत्वव्यवस्थापनं चावगच्छेयुः।
- ❖सत्प्रतिपक्षदोषाणां विविधस्वरूपं, सत्प्रतिपक्षविभाजकलक्षणं, तत्समन्वयं दलसार्थक्यं च विजानीयुः।

**********